फरवरी तः मार्च २०२६ पर्यन्तम्
माघ-शुक्ल-पूर्णिमा-तः चैत्र-शुक्ल-त्रयोदशी-पर्यन्तम्
(वैक्रमाब्दः-२०८२-८३)

RNI
DELSAN/2013/50379
ISSN:2347-1565

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

( वर्षम्-१३-अ±ः ७-८ )
(संयुक्ता±ः)

सम्पादकः
शैलेन्द्रकुमारसिंहः
सचिवः

एक साहित्यिक त्रैमासिक शोध पत्रिका
एवं
समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति
तथा
सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ ही शोध छात्रों एवं नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति

# "संस्कृत म-जरी"

(आई.एस.एस.एन-2278-8360)

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवदेनाओं, शोध-निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

मूल्यः- एक प्रति रु. 25/- मात्र, वार्षिक सदस्यता शुल्क रु.100/- मात्र

सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका

## "संस्कृत म-जरी"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली संस्कृत अकादमी के नाम से दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट अथवा अकादमी के बैंक खाते सं. 01701040002562285, आई.एफ.सी. कोड- IBKL 0000170 (IDBI BANK- Preet Vihar) में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता -

सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार
प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५
दूरभाष सं.- ०११-२०९२०३६३

ISSN-2347-1565

मूल्यम्- ₹ 25 रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

**फरवरी तः मार्च २०२६ पर्यन्तम्**

वर्षम्-१३ अ±ः-७-८

(संयुक्ता±ः)

(वैक्रमाब्दः-२०८२-८३)

**(माघ-शुक्ल-पूर्णिमा-तः चैत्र-शुक्ल-त्रयोदशी पर्यन्तम्)**

**सम्पादकः**
**शैलेन्द्रकुमारसिंहः**
**सचिवः**

**सहायकसम्पादकः**
**प्रद्युम्नचन्द्रः**


| क्र.सं. | अनुक्रमणिका | पृष्ठ-संख्या | |
|---|---|---|---|
| १. | सम्पादकीयम् | | III |
| २. | बद्रीश सप्तकम् | डॉ. युवराजः भट्टराई | १ |
| ३. | श्रीब्रह्मस्तुतिः | डॉ. रामकिशोरमिश्रः | ३ |
| ४. | परमात्मनः कौशलम् | डॉ. देवीसहायपाण्डेयः | ४ |
| ५. | परमात्मनः प्रति जिज्ञासा | डॉ. देवीसहायपाण्डेयः | ५ |
| ६. | भरतः | डॉ. शारदा-रमेश-गाडगे | ६ |
| ७. | सच्चरित्रता | डॉ. राकेशः शास्त्री | ८ |
| ८. | प्रायश्चितः | डॉ. राकेशः शास्त्री | ९ |
| ९. | माता | श्री नारायणदाशः | १० |
| १०. | बाउलभक्तस्य नीडः | डॉ. हर्षदेवमाधवः | ११ |
| ११. | बाउलभक्तस्य सङ्केतः | डॉ. हर्षदेवमाधवः | १२ |
| १२. | क्षणिकाः -३ | प्रो. शुकदेवः शर्मा | १४ |
| १३. | क्षणिकाः -४ | प्रो. शुकदेवः शर्मा | १६ |
| १४. | अदम्यः उत्साहः | श्रीमती सरोजः गुलाटी | १८ |
| १५. | यत्र रोगः तत्र वैद्यः | श्रीमती अञ्जू बाला | १९ |
| १६. | महाकवि कालिदासः | श्री अजय-आनंदः | २० |
| १७. | भारतीयसभ्यता-संस्कृतेः प्रतीकाः एते उत्सवाः | सुश्री सुरीति नागरः | २२ |
| १८. | शनैश्चरचरितम् | डॉ. रामकिशोरमिश्रः | २४ |
| १९. | परशुरामचरितम् | डॉ. रामकिशोरमिश्रः | २५ |


**दिल्ली संस्कृत अकादमी**

(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)

DELHI SANSKRIT ACADEMY

(Govt. of N.C.T. , Delhi)

**ई-पत्रिका**

## प्रकाशकः

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005

दूरभाषः - 011- 20920363

## सदस्यताशुल्कम्

प्रति-अङ्कम् : ₹25 रूप्यकाणि

वार्षिकम् : ₹250 रूप्यकाणि

ISSN : 2347-1565

©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः अन्तरर्जालमाध्यमेन (online) अथवा सी०टी०सी० चैक माध्यमेन

(दिल्लीसंस्कृतअकादमीपक्षे)

Mode of payment:
Demand Draft, Online or by CTC Cheque
( In favour of Delhi Sanskrit Academy)

E-mail Id : sanskritpatrika.dsa@gmail.com
sanskritprakashan.dsa@gmail.com
Website : www.sanskritacademy.delhi.gov.in

# सम्पादकीयम्

**अयि गीर्वाणवाणीसमुपासकाः सुहृदयाः!**

हेमन्त-शिशिरऋतौ समाप्तावर्तताम्। इदानीम् ऋतुराजः पादौ प्रसारितवान्। चैत्र-वैशाख-मासयोः वसन्तेन सह-नवा±ुराणामागमनानन्तरं फाल्गुनः प्रकृतौ वर्ण-प्रसारणं कृत्वा सर्वेषां मनः र³ैः पूरयितुम् आरब्धवान्। फाल्गुने होलिकादहनस्यावसरे रबीशस्यं अग्नये समर्प्य राष्ट्रस्य सुखं समृद्धिं च कामयते तथा च वैशाख्यावसरे पक्वस्य शस्यस्य कर्तनमारभ्यते तदैव एतत् वसन्तऋतुः समाप्तिं प्राप्नोति। फाल्गुन-र³ोत्सवः समेषां समुदायानां मध्ये तथैव एकत्वं स्थापयति यथा भारतं भाषायिकं सांस्कृतिकं च विविधतां विद्यमानमपि एकीकृतम् अस्ति। एतां भावनां मनसि धृत्वा भवतां सर्वेषां संस्कृताध्येतॄणां विद्यार्थीनां संस्कृतप्रेमिणां च जीवने परिपक्वतां नूतनवर्णानां च उल्लासस्य कामनया सह संस्कृतचन्द्रिका-मासिकी-बालपत्रिकायाः ई-पत्रिकारूपेण प्रकाशितं त्रयोदशतममवर्षस्य फेब्रुवरीतः मार्च २०२६ मासपर्यन्तं संयुक्ता±ं (१३/७-८) समर्पयतीयमाकादमी।

संयुक्ता±ेऽस्मिन् डॉ. युवराजभट्टराईमहोदयानां, डॉ. रामकिशोरमिश्रमहोदयानां, डॉ. देवीसहाय-पाण्डेयमहोदयानां, डॉ. शारदा-रमेश-गाडगेमहोदयानां, डॉ. राकेशशास्त्रिमहोदयानां, श्रीनारायणदाश-महोदयानां, डॉ. हर्षदेवमाधवमहोदयानां, प्रो. शुकदेवशर्ममहोदयानां, डॉ. वेणीमाधवशास्त्रिमहोदयानां, श्रीमतीसरोजगुलाटीमहोदयानां, सुश्रीअंजूबालामहोदयानां, श्रीअजयआनन्दमहोदयानां तथा च सुश्रीसुरीति-नागरमहोदयानां अनेकाः बालोपयोगिरचनाः विद्यार्थीनां जिज्ञासूपाठकानाञ्च कृते प्रकाशिताः याः अतीव रोचकाः संस्कृते रुचिवर्धकाश्च वर्तन्ते। लेखकैः अपि अनुरोधः क्रियते यत् बालकेषु सृजनशीलता-भाषाकौशलं च वर्धयितुं नूतनानि लेखनानि प्रेषयन्तु। आशासे बालपत्रिकेयं बालकैः सोत्साहं च पठिष्यत इति।

शकाब्दः १९४७ (चैत्र-शुक्ल-एकादशी)
(कामदा-एकादशी)

निवेदकः
**(शैलेन्द्रकुमारसिंहः)**
सचिवः

# बद्रीश सप्तकम्

-डॉ. युवराजः भट्टराई*

बद्रीवनेऽस्ति सततं श्रवणाय मन्ये,
सा काकली मधुरकोकिलकूजितानाम्।
किं बालकाव्यकवनं मम भक्तिपूर्णम्,
भक्तस्य भावभरितं च न स्वीकरोषि? ॥१॥



बद्रीश! घोरविपिने शिखरेऽति दिव्ये,
प्राभातिकं तव पठन्ति खगाश्च नित्यम्।
मध्येदिनं भ्रमरगुञ्जनमस्ति रम्यम्,
त्वत्सेवने जलदगर्जितमस्ति सायम् ॥२॥

पुष्पाणि गन्धभरितानि च ते प्रियाणि,
ज्ञात्वा जनाश्च कुसुमैः परिपूजयन्ति।
पद्मप्रफुल्लकुसुमैश्च समर्चयामि,
गृहणीष्व पूजनमिदं बदरीश! विष्णो! ॥३॥

तद्रोचते मृदुलम3लवाद्यनादः,
तत्रापि श2निनदोऽस्ति विशेषघोषः।
स्थित्वा क्षणं जलद! बद्रीवने गिरिस्थे,
तस्मै समर्पय सुगर्जनश2घोषम् ॥४॥

संश्रूयते भुवि सदा बदरीशगाथा,
बद्रीवने भवति भक्तगणोत्सवश्च।
भक्ताः जनाः सहृदयाश्च सुखं लभन्ते,
द्रक्ष्याम्यहं वद कदा शुभमन्दिरं ते? ॥५॥

* -२१, प्रथम-तलम्, विथि सं.-५, प्रेम विहारः, नंगली डेयरी, नजफगढम्, नवदेहली-११००४३

चित्तं तु वक्रगतिकं प्रचलत्यमार्गे,
बद्रीश! तत्स्वनिकटे नय शीघ्रमेव।
भक्तं निजं सकरुणेन हृदा सुखेन,
सम्पत्समृद्धिमहितं कुरु नित्यमेव ॥६॥

भावा भवन्ति सुजनेषु सदैव शुद्धाः,
नैवास्ति मे किमपि सद्गुणभक्तिभावः।
दत्ते पिता निजसुताय समीहितं तत्
तिष्ठाम्यहं तव पुरः न प्रदास्यते वा? ॥७॥



# श्रीब्रह्मस्तुतिः

-डॉ. रामकिशोरमिश्रः*

द्रष्टा य आदिरिह वेदचतुष्टयस्य,
स्मर्ता स आदिरथ सर्वपुराणकानाम्।
स्रष्टा य आदिजनकोऽस्ति चराऽचराणाम्,
श्रीब्रह्मणे भगवतेऽत्र नमोऽस्तु तस्मै॥१॥

योऽस्त्यात्मभूरिह तथा भुवने स्वयम्भूः,
वेधास्तथा स कमलोद्भवनामसेव्यः।
पूर्वः कथं स पुनरण्डजनामगीतः?
श्रीब्रह्मणे भगवते हि नमोऽस्तु तस्मै॥२॥



धाता स्वभूर्य इह सर्वजगद्विधाता,
लोके पितामहपदेन सदाऽऽप्तकीर्तिः।
माता न काऽपि जनकोऽपि न कोऽपि यस्य,
श्री ब्रह्मणे भगवतेऽत्र नमोऽस्तु तस्मै॥३॥

ध्यानेन गन्धकुसुमैः सितचन्दनेन,
यं पद्मयोनिमधुना हृदये भजामि।
पद्येन तत्कवितया पयसा च माल्यै-
स्तं श्रीप्रजापतिमहं भुवि पूजयामि॥४॥

विद्यार्थिनां हि ज्ञानाय प्रतिदिनं गानाय च।
सर्वजन-सुबोधाय ब्रह्मस्तुतिर्विरचिता ॥५॥

-द्वारा श्रीसौरभमिश्रः, २९५/१४ पीरामपुरम्, खेकड़ा, (बागपत) उत्तरप्रदेशः

# परमात्मनः कौशलम्

-डॉ. देवीसहायपाण्डेयः*

पश्य तस्य मायाविस्तारम् ।
चित्रविचित्रमिमं संसारम्,
नानारूपाकृतिविस्तारम् ।
शशिरव्योः प्रदीपज्वलनम्,
भरितमक्षयं तैलमपारम् ।
पश्य तस्य मायाविस्तारम् ॥



नभसि सघनतारकप्रसारः,
तस्मिन् विपुलवेगविस्तारः ।
निहितस्तेषु च ह्यतुलितभारः,
न हि रुध्यते सततसञ्चारः ।
वल्गितदृढव्यवस्थां दृष्ट्वा,
मनसि भवत्याश्चर्यमपारम् ।
पश्य तस्य मायाविस्तारम् ॥

किरणैः सागरजलं कर्षयति,
कर्षितजलं सदैव वर्षयति ।
तृषातुराणां जलं पाययति,
जडज३ममयजगद्हर्षयति ।
सर्वस्मै भोजनं तथैवं,
जलं दापयति रुच्यनुसारम्
पश्य तस्य मायाविस्तारम् ॥

यच्चसौरभं सुमने जातम्,
फले यच्च माधुर्यं ज्ञातम् ।
अनुरञ्जकः रञ्जयति सर्वं,

---

-द्वारा श्री मनीषचन्द्रपाण्डेयः, लवकुश नगरम्, रामघाटः, अयोध्या, उत्तरप्रदेशः-२४१३३

धूमिलसंध्यां सितप्रभातम् ।
नहि जाने सः कुत्रनिलीनः,
कृतवान् यो निखिलं संसारम् ।
पश्य तस्य मायाविस्तारम् ॥

## परमात्मनः प्रति जिज्ञासा

जानेऽहं प्रातर्न सरसिव्योम्नि को तस्य तीरे,
नैशान्तध्वान्तमलिनपटं क्षालयति ज्योतिनीरे।
सिन्दूरस्यैव सुघट इवोदभूत्तु सूर्योऽपि काले,
रम्यारुण्यं दिनकरकरैर्लिप्यते व्योमभाले ॥



मन्दं-मन्दं चलति पवनः शोकसन्तापहारी,
भानोर्बिम्बो लसति ललितलोललोचनान्दकारी ।
हर्षेमग्ना विपुलविहगा वृक्षशाखावलम्बे,
उड्डीयन्ते कलरवरता व्योमवृक्षे कदम्बे ॥

लोलं लोलं लुलितमखिलं प±जं भृ३युक्तम्,
संमोदश्च प्रकृतिसुकरैर्वण्ट्यते नित्यमुक्तम् ।
वल्लीवृन्दं नटति ललनालासयुक्तं सलीलम्,
दृष्ट्वा रूपं विमलसलिले मोहितं व्योमनीलम् ॥

# भरतः

-डॉ. शारदा-रमेश-गाडगेः*

'शीले, शीले, त्वरस्व, त्वरस्व, शीघ्रं सिद्धतां कुरु। जनवरीमासं अस्माभिः अस्माकं भारतवर्षं गन्तव्यम्। मम त्यागपत्रं स्वीकृतं मम स्वामिना।'............ माधवः सोत्साहं वदन् गृहं प्रविष्टः। स३णकयन्त्रं निरीक्षमाणा शीला तस्य उत्साहं दृष्ट्वा मनसि आश्चर्यमकरोत्। ''नूनं बालसदृशः अस्ति एषः।'' ........ स्वमनसि तस्याः प्रतिक्रिया। सा माधवं अवदत् ''भोः अहं सिद्धा एव। किन्तु तत्र गत्वा किं करणीयम्? कुत्र वस्तव्यम्?'' इति आदौ चिन्तयतु भवान्। ''भवान् सदैव गन्तुम् अधीरः। किन्तु तत्र किं करणीयम् इति न चिन्तितम् ।''

माधवः अवदत् -''अयि, पुनः पुनः एष तव प्रश्नः न मे रोचते। अस्ति नु वर्धानगरे अस्माकं विशालं गृहं-क्षेत्रं च। तत्र गत्वा निवसामः। पञ्चविंशति वर्षाणि अत्र अमेरिकादेशे स्थित्वा अपि न मे मनः अत्र रमते। भारतदेशः अस्माकं जन्मभूमिः। तत्रैव मम मनः धावति। इति त्वं सम्यक् जानासि।''

''आम्, सत्यम्, दृढं जाने। किन्तु एतावान् प्रदीर्घः कालः अस्माभि अत्र यापितः। नैकानि मित्राणि प्राप्तानि। एतद् गृहं निर्मितम्। एतद् सर्वं विहाय गन्तुम् अहं न उत्सहे। तत्र वर्धानगरे किम् अस्ति इदानीम् अस्माकम्'' तत्रस्थं गृहं भवता स्वानुजाय राघवाय दत्तम्। क्षेत्रमपि तस्य नाम्ना कृतम्। किमस्ति भवतः?

भार्यायाः एष प्रÃË राघवाय नारोचत्। सः अवदत् -'अयि, एवं अविश्वासः न कार्यः मम अनुजे। भरतसदृशः अस्ति मे भ्राता। तस्मै सर्वं रक्षणार्थं दत्तमः। मम सम्पत्तिं सः न आहरेत्।'

''हु ऽऽ भरतः केवलं रामायणे वर्तते, न प्रत्यक्षे जीवने भोः। व्यवहारे तु पुरुषो हि अर्थस्य दासः।'' इति उक्त्वा शीला आसनात् उत्थाय सत्वरं पाकगृहं गता। माधवः तत्र एव किमपि चिन्तयन् आसन्दे उपविष्टः। गत-जीवनस्य स्मृतिपटः तस्य अक्ष्णोः पुरतः अवतीर्णः। वर्धानगरे तस्य जन्म अभवत्। तस्य प्रियतरौ अध्यापकौ आस्ताम्। उभौ अपि अतीव छात्रप्रियौ। गृहे माधवः तस्य अनुजः राघवः च आस्ताम्। चतुष्कोणः एष परिवारः अतीव शान्तः, अध्ययनशीलः, साहायतत्परः, लोकसंग्रहशीलः च आसीत्। शिक्षणं समाप्य जीविकार्थं माधवः मुम्बईं गतः। तदा तस्य माता नितरां दुःखिता। माधवस्य पिता ताम् असान्त्वयत्- 'अयि, अपत्यानाम् उत्कर्षे एव पित्रोः आनन्दः। माधवराघवाभ्याम् अग्रे एव गन्तव्यम्। मुम्बईनगरे वर्षत्रयं स्थित्वा माधवः साक्षात्कारार्थं नैकान् कार्यालयान् अगच्छत्। सः अधिकाधिकम् अग्रे गन्तुम् उत्सुकः आसीत्। तस्य सौभाग्यात् अमेरिकादेशे जीविका तेन प्राप्ता। सः सानन्दम् अमेरिकायाम् स्थितः। मातुः पितुः अनुजस्य च स्नेहपाशेन बद्धः सः स्वमनः तेषु एव निधाय विदेशं गतः। शनैः शनैः तत्र एव सः स्थिरः अभूत्। अत्रान्तरे राघवः अपि जीविकार्थं पुणेनगरं गतवान्। वर्धास्थं गृहं कदापि न विक्रेतव्यम् इति निश्चित्य जीविकार्थं पुणेनगरं गतवान्। वर्धास्थं गृहं कदापि न विक्रेतव्यम् इति तस्य मातुरपि इच्छा आसीत्।

प्रतिवर्षं दीपावल्यां वर्धानगरम् आगन्तव्यम्। पितृभ्यां सह वस्तव्यम्। इति माधवराघवयोः नियमः। एष नियमः उभाभ्यामपि दशवर्षपर्यन्तं अनुसृतः। उभयोः विवाहसमारोहो सम्पन्नौ। माधवेन पुत्ररत्नं प्राप्तम्। राघवस्य

*-११ बी, भांगे विहारः, त्रिमूर्तिनगरम्, नागपुरम्, महाराष्ट्रम्-४४००२२

रूपगुणवती कन्या सर्वेषां स्नेहभाजनम् अभवत्। अकस्मात् कस्मिन्नपि अपघाते माधवस्य पितरौ दिवङ्गतौ। तयोः वार्षिकः-श्राद्धार्थं माधवः सपरिवारम् आगतवान्। प्रस्थानसमये सः राघवम् अवदत् 'राघव, इतः परं प्रतिवर्षम् अत्र आगमनं न सम्भवति मम। यथाशक्यं त्वं द्रष्टुम् अहम् अवश्यम् आगमिष्यामि। किन्तु नास्ति मे निश्चितिः। एतद् अस्माकं गृहं मातुः अलंकारादिकं क्षेत्रं च तव एव अस्तु। त्वमेव सर्वं रक्ष।' इति उक्त्वा तेन सर्वं राघवाय समर्पितम्।

अनन्तरं स्वदेशं विहाय अमेरिकायां रतः माधवपरिवारः क्वचिदेव भारतवर्षमगच्छत्। प्रारम्भे राघवेण सह दूरभाषसम्भाषणं नित्यम् आसीत्। कालान्तरेण सम्भाषणं विरलतां गतम्। क्वचिद् मासे एकवारम् अनन्तरे षण्मासे एकवारं सः तेन सह अभाषत।

कालचक्रं शनैः शनैः अग्रे अगच्छत्। माधवस्य पुत्रः यौवनम् आरूढः। अकस्मादेव माधवस्य मनसि विचारः प्रविष्टः - इदानीं मम पुत्रः भारतवर्षे वसतु न अत्र विदेशे। एष विचारः शनैः शनैः दृढः अभवत्। शीलायै एष विचारः न अरोचत। किन्तु माधवस्य निश्चयः अविचलः आसीत्। वर्धानगरं गत्वा एव वस्तव्यम् इत्यपि तेन निश्चितम्। तत्र स्थित्वा कोऽपि व्यवसायः करणीयः इति तस्य मतिः। किन्तु शीला सदैव विरोधम् अदर्शयत। राघवः तद् गृहं क्षेत्रं सुवर्णादिकं स्वहस्तगतं कृत्वा निश्चिन्तः स्यात् इति तस्याः मतं दृढम् आसीत्। सः माधवं तत्र न प्रवेशयत्।

शीलायाः प्रतिक्रियां श्रुत्वा माधवः किञ्चित् विचलितः। कदाचित् सत्या भवेत् अस्याः वाणी। धनं मनुजं लोभयति मोहयति च। इति विचारः तस्य मनःस्वास्थ्यम् अहरत्। सः दूरभाष-माध्यमेन स्वनिश्चयम् आगमनस्य दिना±ं च राघवाय असूचयत्। राघवः अतीव आनन्दितः अभवत्।

जनवरीमासः प्राप्तः। अमेरिकादेशं विहाय माधवः सपरिवारं भारतवर्षं प्राप्तः। तेषां स्वागतार्थं मुम्बईनगरे विमानस्थले राघवः सपरिवारः उपस्थितः आसीत्। अनन्तरं ते सर्वे मिलित्वा वर्धानगरं प्राप्ताः। स्वकीयं जन्मगृहं दृष्ट्वा माधवः अतीव आनन्दितः। राघवेण तद्गृहं स्वच्छीकृतं सज्जीकृतं च आसीत्। जीर्णगृहस्य तद् नूतनं रूपम् अतीव आकर्षकम् आसीत्। गृहं प्रविश्य पित्रोः बालजीवनस्य स्मृतिभिः माधवः भावाकुलः अभवत्। शीला सर्वं निरीक्षमाणा पुत्रं किमपि किमपि अकथयत्। स्नानभोजनादिकं तैः सम्पादितम्। राघवः अवदत्-''आर्य, किञ्चित् विश्रम्य अपराह्ने वयम् अस्माकं क्षेत्रं गच्छामः। अहं भवन्तं सर्वं दर्शयिष्यामि। मातुः सुवर्णाल±ाराः अधिकोषे निहिताः। अधिकोषे सुवर्णकक्षस्य एषा कुञ्चिका इति उक्त्वा सः स्वकक्षात् कामपि कुञ्चिकां निष्कास्य माधवाय अयच्छत्। श्वः अहं पुणेनगरं गमिष्यामि। भवतः सर्वं मया यथाशक्ति रक्षितम्। इदानीम् विगतभारः अस्मि। निश्चिन्तः अस्मि अहम् 'इति उक्त्वा राघवः माधवस्य समीपे एव तल्पे निद्रां गतः। तस्य शान्तमुद्रां प्रेम्णा स्पृष्ट्वा माधवः मनसि अवदत् -'भरतः न केवल रामायणे अपितु कलियुगे अपि वर्तते।' तयोः सम्भाषणं अपरस्मिन् कक्षे उपविश्य श्रुण्वती शीला आत्मानं नितरां अदूषयत्। मनसि एव वारं वारं तं राघवरूपं भरतम् अनमत्।

# सच्चरित्रता

-डॉ. राकेशः शास्त्री*

एकस्मिन् ग्रामे एकस्य ब्राह्मणस्य आम्राणाम् एकम् अतिविशालम् उद्यानम् आसीत्। एकदा तस्य समीपे एकः युवकः आगच्छत्, अप्रार्थयत् च स्व-भृत्यभावम्। तस्य विपन्नाम् अवस्थां विचार्य ब्राह्मणेन सः युवकः स्व-उद्यानस्य रक्षणार्थं नियुक्तः। तदनन्तरं दत्तचित्तः सः तस्य उद्यानस्य अन्वेक्षणं रक्षणं च करोति स्म।

एवं बहूनि वर्षाणि व्यतीतानि। सः युवकः उद्याने खलु एकस्मिन् स्थले निर्मितायां पर्णशालायाम् एव वसति स्म, तन्मयभावेन स्वकर्तव्यं करोति स्म। ब्राह्मणः अपि तस्य समर्पणभावेन अतिप्रसन्नः आसीत्।

एकदा ब्राह्मणस्य समीपे तस्य घनिष्ठः मित्रम् आगच्छत्। तं मित्रं सः ब्राह्मणः स्व उद्यानम् आनयत्। उद्यानं गत्वा सः तं युवकं शय्या-प्रसारणाय मधुराणि फलानि च आनेतुम् आदिदेश। पर्णशालायाः बहिर्भागे शय्यां प्रसार्य युवकः विनम्रभावेन शीतलं जलं पानार्थम् आनीतवान्।

ततः सः आम्राणि आनेतुम् अगच्छत्। अति प्रयत्नेन सः कानिचित् पक्वानि फलानि गृहीत्वा ब्राह्मणस्य समीपम् आगतवान्। तानि च सर्वाणि तत्र स्थिते जलपात्रे प्रक्षाल्य स्व स्वामिनः समक्षे प्रस्तुतवान्।

ब्राह्मणः प्रसन्नतापूर्वकं तानि आम्राणि स्व मित्राय दत्वा स्वयं अपि भक्षयितुम् आरब्धवान्। ओह! इदं किम्? एतानि आम्राणि तु आम्लानि सन्ति। क्रुद्धः ब्राह्मणः युवकं अवदत्-'एतानि आम्राणि तु मधुराणि न सन्ति। एतावतः कालात् त्वम् अत्र निवससि, इदानीं यावत् अपि न जानासि, कस्य वृक्षस्य मधुराणि फलानि कस्य च आम्लानि, इति।'

तदा सः युवकः विनम्रभावेन उवाच- 'श्रीमन्! अहम् अस्य उद्यानस्य अवेक्षणं रक्षणं च करोमि केवलम्। भवतः अनुमतिं विना एतेषाम् आस्वादनं कथं कर्तुं शक्यते मया?'

युवकस्य एतत् कथनं श्रुत्वा ब्राह्मणः तस्य मित्रं च अतीव प्रसन्नौ जातौ, तस्य सच्चरित्रतया च प्रसन्नः भूत्वा तस्य वेतनं द्विगुणं कृतं तेन ब्राह्मणेन।



*-सेवानिवृत्त-संस्कृत-विभागाध्यक्षः, श्रीगोविन्दगुरुराजकीयमहाविद्यालयः,
बाँसवाड़ा, राजस्थानम्-३२६००१, ( १ जे, ३८ हाउसिंग-बोर्ड-कालोनी, बाँसवाड़ा, राजस्थानम् )

# प्रायश्चितः

-डॉ. राकेशः शास्त्री

भारवेः पिता नारायणस्वामी संस्कृतस्य प्रकाण्डः विद्वान् आसीत्। स्व पुत्रम् अपि सः श्रेष्ठविद्वत्रूपेण द्रष्टुं वाञ्छति स्म। अनेन सः प्रायः तं भारविं त्रुटिषु प्रताडनाम् अकरोत्। स्व वैदुष्ये गर्विताय भारवये एतत् अल्पम् अपि न रोचते स्म।

एकदा विद्वत्संकुलायां सभायाम् एव अस्य पिता भारविं भर्त्सितवान्। पितुः व्यवहारेण खिन्नः क्रुद्धः भारविः तस्य वधस्य निश्चयम् अकरोत्। तेन च रात्रौ स्वपितुः वधस्य योजना निर्मिता।

स्वपितुः घाताय यदा सः तस्य कक्षं निकषा अगच्छत्। तदा कक्षे उल्लिखितं श्लोकं पठित्वा स्थितः अभवत्। तत्र लिखितम् आसीत् श्लोकबद्धम् -

**''जनेन कार्येषु कदापि शीघ्रता न कार्या।**
**त्वरया कार्यकरणेन परिणामे पश्चात्तापः भवति।।''**

कक्षे स्थितः भारवेः पिता तस्य मातरं प्रति भारवेः योग्यतायाः विद्वत्तायाः च प्रशंसाम् अकरोत्। सः कथयति स्म-'अहं तु भारविं सर्वोत्कृष्टत्वेन द्रष्टुं वाञ्छामि। अनेनैव तं त्रुटिषु प्रताडनं करोमि। एतत् सर्वं तस्य वैदुष्यवर्धनार्थम् एव अस्ति।''

स्वपितुः वात्सल्यमयीं वाणीं श्रुत्वा भारवेः कोपः शान्तः अभवत्। स्व घृणित-निर्णयार्थं तेन पितरं प्रति क्षमायाचना कृता। अस्य पापस्य प्रायश्चित्ताय च निवेदनं खलु कृतम्।

तस्य अतीव आग्रहं दृष्ट्वा पित्रा सः श्वसुरालयं गत्त्वा द्वादशवर्षाणि यावत् सेवाकार्यं कर्तुम् आदिष्टः। पितुः आदेशस्य पालनार्थं सः स्व श्वसुरालयं गत्वा तत्र सर्वेषां शुश्रूषाम् अकरोत्। तत्रैव च 'किरातार्जुनीयम्'' इति नाम्ना प्रथितस्य महाकाव्यस्य संरचनाम् कृतवान्।



# माता

- नारायणदाशः*



सर्वतः श्रेष्ठा मम माता
सर्वतः प्रिया मम माता।
कोमलगल्ले स्पृशति स्नेहेन
स्नेहेन अलकान् सज्जीकरोति
प्रातरेव एवम् उत्थापयति
विद्यालयार्थं सज्जीकरोति।
सर्वतः श्रेष्ठा मम माता
सर्वतः प्रिया मम माता।
स्वहस्तेन मां भोजयति
खेलेष्वपि पाठं पाठयति
पुत्तलिकानां विवाहं रचयति
क्रोडे नीत्वा मां स्वापयति।
सर्वतः श्रेष्ठा मम माता
सर्वतः प्रिया मम माता।

हिन्दीमूलम्- अञ्जलिजयपुरिया
संस्कृतानुसर्जकः - नारायणदाशः

*-संस्कृतविभागाध्यक्षः, रामकृष्णमिशनाबासीयस्वयंशासितमहाविद्यालयः, नरेन्द्रपुरम्, कलिकाता-१०३, पश्चिबङ्गः

# बाउलभक्तस्य नीडः

-डॉ. हर्षदेवमाधवः*

पक्षिदास!
कथं डयिष्यसे
गगने,
यदि नीडस्य मायां न त्वक्ष्यसि?
नीडस्य बहिः
पतनान् न, भूमौ पतिष्यसि,
किन्तु
स±ुचितौ ते पक्षौ
लभिष्येते
गगनद्वारस्य कुञ्जिकाम्।
पक्षिदास!
नीडस्तु माया
तव शरीरमपि नीडोऽस्ति
नीडस्य त्यागादेव
त्वं ज्ञास्यसि
सूर्यलोकम्।
पश्य!
त्वत्पश्चाज्जाताः शावकाः
सूर्यस्नानं कुर्वाणाः
समीराणासारेऽपि
स्वमार्गं रचयन्ति।
पक्षिदास!
अयं ते नीडो नास्ति
त्वया नीडो रचनीयोऽस्ति
मनसो मनुष्येण...
दूरं दूरं
नीडादस्माद् दूरम्... ॥






* ८, राजतिलक बंगलो, आबादनगरम्, बस स्थानकस्य समीपे, अहमदाबादः-३८००५८

# बाउलभक्तस्य स±तः

-डॉ. हर्षदेवमाधवः

दामोदरनदी तीरे
बभूवाहं
कदम्बः।
बभूवाहं
जलविवर्तस्थो बकः,
कदाचिद् बभूवाहं
जलक्रीडको मीनः।
दामोदरनदी
रूपं परिवर्तमाना
प्रवहन्ती बभूव,
बभूवाहं
शरीराणि परवर्तमानो
जीवः।
दामोदरनदी
मां जानन्ती भवेत्,
अहं तु
प्रत्यभिज्ञानरहितः
भ्रामं भ्रामं
गतः,
आगतः,
गतः, पुनरागतः।
एतद् वारं
नौकायामासीनोऽहं
दामोदरनदि!
त्वं प्रवह-



* ८, राजतिलक बंगलो, आबादनगरम्, बस स्थानकस्य समीपे, अहमदाबादः-३८००५८

प्रवक्ष्यसि।
मया तु लब्धा नौका
गच्छामि,
गन्ताऽस्मि
यत्र भवेन्मे मनुष्यो मानुषः।
अथ, नागमनं मे भविष्यति...
दामोदरनदि!
त्वमसि प्रकृतिः।
साधय त्वमपि
मत्तो दूरम्...।



# क्षणिका: -३

-प्रो. शुकदेव: शर्मा*

**१. अकार्यम् ( वि. )**
अनुचितं अकरणीयं अप्रशस्तं अनुपयुक्तं
वा कर्म अकार्यं
यत्-
विगर्हन्ति निन्दन्ति अपवदन्ति धिक्कुर्वन्ति
सत्पुरुषा:
वृद्धा: वा लोके।
(नञ् +√कृ. तना.+ण्यत्)

**२. अकालम् ( वि.-गलत समय )**
असमायिक: अनुपयुक्त: प्राक्कालिक: कुसमयो
वा अकाल:
य:-
वर्धते पुष्णाति विकसति वा
बालानामकालज्ञो मनोभव:।
(नञ्+काल.)

**३. अकिञ्चन: ( वि.-बेचारा )**
नि:स्वो दीनो निर्धनो दरिद्र: असहायो वा
अकिञ्चन:
यस्य-
नास्ति न भवति न विद्यते
किञ्चिदपि धनम्।
(नञ्+किम्+चन+अव्य.)

**४. अकिञ्चिज्ज्ञ: ( वि.-मूर्ख )**
अज्ञो मूढो मुहिर: अज्ञानिन् अचेतनो वा
अकिञ्चिज्ज्ञ:।
य:-
न जानाति न वेत्ति न चेतयते किञ्चिदपि।
(नञ्+किञ्चित्+ √ज्ञा. क्र्या.+ क.)

**५. अकिञ्चित्कर: ( वि.-सीधा-साधा )**
सामान्य: सरलो निश्छल: सहजो भद्रपुरुषो वा
अकिञ्चित्कर:
य:-
न करोति न प्रभवति न शक्नोति न समर्थोभवति
किञ्चिदपि कर्त्तुम्।
(नञ्+ किञ्चित्+ √कृ.तना.+अप्.)

**६. अकुतोभय: ( वि-निडर )**
निर्भयो निरात±ो निश्श±ो वा
अकुतोभय:
य:-
न बिभेति न त्रस्यति न भेषति
कुतोऽपि कस्मादपि।
(नञ् +किम्+तसिल्+तभी.दिवा.+अच्.)

**७. अकुशल: ( वि. )**
अचतुर: अप्रवीण: अशक्त: अमेधाविन् वा
अकुशल:
य:-
लातुं प्राप्तुं लब्धुं अधिगन्तुं वा
असमर्थ: कुशं शुभम्।
(नञ्+कूश+√ ला. अदा.+क. )

**८. अकूपार: ( सूर्य )**
भास्करो दिवसकरो विवस्वत् मरीचिन् वा
अकूपार:
य:-
अर्पयति यच्छति ददाति वितरति वा दीप्तिम्।
(नञ्+कूप+√ऋ.चुरा.+अण्.)

* अतिथि आचार्य:,विÂवेÂरानन्द वैदिक-शोध-संस्थानम्, साधु-आश्रम:, होशियारपुर- १४६०२१, पञ्जाबप्रदेश:

**९. अक्रमः ( वि. )**
क्रमहीनो नियमरहितः अव्यवस्थितः अनुचितो
वा अक्रमः
यत्र–
नास्ति न विद्यते न भवति
कोऽपि क्रमो व्यवस्थितिर्वा।
( नञ्+√क्रम्.भ्वा.+अच्. )

**१०. अक्रियः ( वि–सुस्त )**
अकर्मन् आलस्यः क्रियाशून्यः कर्त्तव्योपेक्षिन् वा
अक्रियः
यः–
न करोति न प्रवर्त्तते न चेष्टते न प्रयतते वा
क्रियायां कर्मणि।
( नञ्+√कृ.तना.+श+रिङ्+इयङ् )

.



# क्षणिकाः -४

-प्रो. शुकदेवः शर्मा*

**१. अक्रूरः ( वि. )**
कृपालुः दयालुः सहृदयः अनृशंसो वा
अक्रूरः
यः-
न कृन्तति न खण्डयति न सन्तापयति वा भूतानि।
(नञ्+ √कृत्. तुदा.+ रक्+ धातोः 'क्रू' आदेशः)

**२. अक्रोधः ( वि. )**
अकोपनः अक्रोधनः अरोषणः क्रोधहीनो वा
अक्रोधः
यः -
न क्रुध्यति न कुप्यति न क्लाम्यति वा अकारणमसहायेषु।
(नञ्+√क्रुध्.दिवा.+घञ्)

**३. अक्लिष्टः ( वि. )**
अक्लिशितः अखिन्नः क्लेशशून्यः
आश्रान्तो वा अक्लिष्टः।
यः-
न क्लिश्यते न खिद्यते न श्राम्यति न क्रन्दते वा कुर्वन् कर्माणि।
(नञ्+√क्लिशः दिवा.+क्त.)

**४. अक्षतः ( वि.-अनटूटा )**
अविच्छिन्नः अविभक्तः अवियुक्तः समग्रो वा
अक्षतः।
यः-
न क्षणुते न वियुज्यते न विभज्यते न त्रुट्यति वा कथमपि।
(नञ्+√क्षण्.तना+क्त.)

**५. अक्षमः ( वि. )**
अशक्तः असमर्थः असक्षमः अयोग्यो वा
अक्षमः।
यः-
न क्षमते न शक्नोति न प्रभवति न योग्योभवति वा कर्तुं किमपि।
(नञ्+ √क्षम्.भ्वा+अच्.)

**६. अक्षयः ( वि.- जो नष्ट न हो )**
अक्षय्यः अनश्वरः अविनाशिन् आत्मभूर्वा
अक्षयः।
यः-
न क्षयति न क्षायति न नश्यति न क्षरति वा कदापि।
(नञ्+√क्षि. भ्वा.+अच्)

**७. अक्षरः ( वि. )**
सनातनः शाश्वतो नित्यो ब्रह्मन् वा अक्षरः।
यः-
न क्षरति न विनश्यति न विलुम्पति वा कस्मिन्नपि काले।
(नञ्+√क्षर.-भ्वा.+अच्. वर्णमालायाः कादयोऽपि अक्षराः)

**८. अक्षशौण्डः ( -जुआ खेलने में दक्ष )**
प्रवीणो निपुणः कुशलः चतुरो वा
अक्षशौण्डः
यः-
अक्षति सञ्चिनोति अवाप्नोति अधिगच्छति वा शौण्ड्यं प्रावीण्यं अक्षे द्यूते।
(√अक्ष्.भ्वा.+अच्+शुण्ड+अण्.
अक्षेषु शौण्डः निपुणः = अक्षशौण्डः)

* अतिथि आचार्यः,विÂवेÂरानन्द वैदिक-शोध-संस्थानम्, साधु-आश्रमः, होशियारपुर- १४६०२१, पञ्जाबप्रदेशः

**९. अक्षि ( नपुं. )**

चक्षुस् नयनं नेत्रं दृष्टिर्वा अक्षि।

यत्–

अश्नुते प्रापयति समुपस्थापयति प्रस्तौति वा जगद्विषयान्।

(√अश्. स्वा.+क्सि.)

**१०. अक्षुण्णः ( वि. )**

अखण्डितः संयुक्तः अविभाजितः समस्तो वा अक्षुण्णः।

यः–

न क्षोद्यते न खण्ड्यते न कृन्त्यते वा केनाप्युपायेन।

(नञ्+√क्षुद्. रुधा.+ क्त.)



# अदम्यः उत्साहः

-सरोजः गुलाटी*

जीवने जनाः अनेकेषां जनानां सम्पर्के आगच्छन्ति। एतेषु जनेषु केचित् जनाः तु ईदृशाः भवन्ति ये मानवानां मनः आकर्षितं कुर्वन्ति। एतेषु जनेषु एकः जनः ईदृशः आसीत् यः अदम्यः उत्साहेन युक्तः आसीत्। सः जनः माम् अति प्रभावितम् अकरोत्। तस्य अदम्य-उत्साहकारणात् अहं बहुवर्षाणि अनन्तरम् अपि तं न विस्मृतवान्, न च जीवनपर्यन्तम् अपि तं विस्मरिष्यामि।

सः जनः तदा मम सम्पर्के आगच्छत् यदा वयं बद्रीनाथस्थले भगवान् बद्रीनाथदर्शनाय अगच्छाम। यदा वयं दर्शनं कृत्वा गृहं प्रति आगच्छाम स्म, तदा अकस्मात् एव मार्गः अवरुद्धः। कारणं पृष्टं तदा ज्ञातं किं जातम्। तदा अस्माभिः ज्ञातम् यत् एतत् भूस्खलनं तु तावत् पर्यन्तं चलिष्यति यावत् सॉयं न भवति। एतत् प्रकृतेः नियमः वर्तते यत् सॉयमेव पर्वताः स्थिराः भवन्ति तदा तेषां मृत्तिका दृढभूता भवन्ति। वयं किंकर्तव्यविमूढाः जाताः। वयं तत्र स्थित्वा प्रकृतेः एतत् रूपं प्रतिक्षणं ईक्षन्ते स्म।

तदा सर्वकारीयकर्मचारिभिः प्रतिपलम् एतत् उद्घोष्यते स्म यत् कोऽपि अस्य मार्गस्य सेवनं न करिष्यति। परं वयं जानीमः यत् विभिन्नप्रवृत्तियुक्तजनाः भवन्ति। पुनः पुनः अवरोध्यमानाः अपि केचित् नवयुवकाः तस्य एव मार्गे अगच्छन् यत्र भूस्खलनं भवति। तदा किम् अभवत् यूयं चिन्तयत।

केचित् तु मार्गम् अलंघयन् परं एकः पर्वतात् नीचैः अपतत्। नीचैः नदी आसीत्। पर्वतस्य मध्ये एकः वृक्षः आसीत् सः तस्मिन् वृक्षे लम्बमानः स्थितः आसीत्। तस्य रक्षणार्थं कोऽपि उपायः न आसीत्। तस्य स्थितिः तु त्रिशंकुः तुल्य एव आसीत्। सर्वे तं रक्षितुम् इच्छन्ति स्म परं भय±रं भूस्लनं दृष्ट्वा कोऽपि एतत् उत्साहं कर्तुं न अशक्नुवन्। एवमेव कालः गतः। सर्वे मूढा इव तत्र स्थिताः एतत् दृश्यं पश्यन्ति स्म।

सहसा कोलाहलः जातः। मया इतस्ततः दृष्टम्। मया किं दृश्यते एकः नवयुवकः शनैः शनैः पर्वतात् नीचैः अवतरति। सः तस्य रक्षणार्थं तत्र गच्छति स्म, यत्र सः लम्बमानः आसीत्। यदा सः नीचैः अवतरति स्म तदा अपि पाषाणखण्डानि उपरितः नीचैः पतन्ति स्म, सः अपि मार्गात् विचलितः न अभवत्। सर्वे एव किंकर्तव्यविमूढा इव एतत् सर्वं पश्यन्ति स्म। एवं यथाकथञ्चित् काठिन्येन तत्र सः उपस्थितः यत्र सः आहतः लम्बमानः आसीत्। तस्य उत्साहं दृष्ट्वा एकः अन्य जनः अपि तस्य रक्षणार्थम् अगच्छत्। द्वौ अथकप्रयासेन पतितं तं जनं अरक्षताम्। तत्र स्थिताः सर्वे जनाः तयोः जनयोः भूरि भूरि प्रशंसाम् अकुर्वन्।

**सत्यम् एव एतत् साहसेन किं किं प्राप्यते।**

*-३४३ अशोकविहारः, फेज-४, देहली-५२

# यत्र रोगः तत्र वैद्यः

-अञ्जू बालाः *

पुरा गुजरातप्रदेशे एकस्मिन् ग्रामे एकं गुरुकुलम् आसीत्। तत्र द्विशतं छात्राः गुरुभ्यः अनेकान् विषयान् पठन्ति स्म। तेषां भोजनादिव्यवस्थाम् एका नगरस्थिता संस्था अकरोत्। एकदा संस्थाधिकारिणः छात्रेभ्यः एकं वैद्यं प्रेषितवन्तः। सः त्रीन् मासान् तत्र अवसत्। किन्तु कोऽपि रुग्णः तस्य समीपे चिकित्सायै न आगच्छत्। वैद्यराजः साश्चर्यं प्रधानाचार्यम् अपृच्छत्-"किम् अत्र कोऽपि रुग्णः न भवति?"

प्रधानाचार्यः विहस्य अवदत्-"वैद्यराज! अस्य एकं रहस्यम् अस्ति। अत्र सर्वे तदा भोजनं कुर्वन्ति, यदा ते तीव्रक्षुधाम् अनुभवन्ति। यदा तेषां भोजनेन तृप्तिः भवति, ततः पूर्वम् एव ते भोजनं त्यजन्ति। एतत् एव एतेषां स्वास्थ्यस्य रहस्यम्।"

भवान् जानाति एव यत् स्वस्थाः नराः औषधं न सेवन्ते। तद्वचनं श्रुत्वा वैद्यः हसित्वा अवदत्-"अत्र मम उपयोगः न अस्ति। अहं गच्छामि। नमस्कारः।" **यत्र रोगः तत्र वैद्यः।**



***-भारतीय विद्या भवनम्, मेहता विद्यालयः, नवदेहली**

# महाकवि कालिदासः

-अजय-आनन्दः*

कविशिरोमणिः कविकुलगुरुः कालिदासः कविश्रेष्ठः इति उच्यते। कालिदासः प्राचीनकालिकः राष्ट्रकविः उच्यते। कालिदासस्य जन्मस्थानं काश्मीरः वा व³ भूमिर्वा राजस्थानं वा उज्जयिनी वेति निश्चितं वक्तुं न शक्यते। न चास्य महानुभावस्य जीवनकालविषये कश्चिद् निर्णयः। महाराजविक्रमादित्यस्य राजसभाया अयं प्रतिष्ठितो विद्वान् इति सर्वैः स्वीक्रियते।

कालिदासस्य काव्ये किञ्चित् अलौकिकम्, अपूर्वम्, असाधारणम् च सौन्दर्यं दरीदृश्यते। तस्य काव्ये आकाश्मीरात् आ कन्याकुमारीम्, आद्वारिकायाः आप्राग्ज्योतिषम् अपूर्वं स्वाभाविकं च सौन्दर्यवर्णनम् उपलभ्यते। तस्य काव्यरसः निपीय निपीय जनानाम् हृदयम् नृत्येन आन्दोलितम् इव भवति। तत्तुल्यः कोऽपि कविः नासीत्। अतः केनचित् कविना उक्तम्–

**पुरा कवीनां गणनाप्रसंगे**
**कनिष्ठिकाधिष्ठित कालिदासः।**
**अद्यापि तत्तुल्यकवेरभावात्**
**अनामिका सार्थवती बभूव॥**

कालिदासस्य काव्यानि व्यंजनामयानि सन्ति। वैदेशिकाः कालिदासं द्वितीयं शेक्सपीयरम् एव मन्यन्ते। गेटेनामा जर्मनकविः स्वर्गलोभूलोकयोः सौन्दर्यम् एकीभूतमिव अभिज्ञानशाकुन्तले अवलोकयति।

कालिदासस्य काव्यानां प्रमुखं वैशिष्टयम् उपमासौन्दर्यम् एव अस्ति। 'उपमा कालिदासस्य' इति आभाणकम् प्रसिद्धमेव। तस्य उपमायाः एकम् उदाहरणं दृश्यताम्–

**संचारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।**
**नरेन्द्रमार्गा॓ इव प्रपेदे विवर्णभावं स स भूमिपालः ।**

अत्र रघुवंशे इन्दुमत्याः स्वयंवरावसरस्य वर्णनमस्ति। इन्दुमती अत्र चलन्ती दीपशिखा इव वर्णिता। वरमाला गृहीत्वा सा यस्य यस्य नृपस्य सम्मुखं याति सः सः प्रथमं तु प्रसन्नः भवति परन्तु यदा सा अग्रे गच्छति तदा तस्य मुखं तथैव म्लानं भवति यथा दीपप्रकाशशून्याः प्रासादाः भवेयुः। अत्र उपमया एव कालिदासेन नृपाणां मनोभावा अपि स्फुटं प्रदर्शिताः। अनया उपमया एव कालिदासेन दीपशिखाकालिदासः इत्युपाधिरधिगतः। कालिदासेन अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रं च इति त्रीणि रूपकाणि, रघुवंशम्, कुमारसम्भवम् च इति द्वे महाकाव्ये, ऋतुसंहारम्, मेघदूतं च इति द्वे खंडकाव्ये विरचितानि। तस्य कौशलम् यथा पद्यरचनायां तथैव नाटकेषु वर्तते।

*-संस्कृत व्याख्याता, सर्वोदय-बाल-विद्यालयः, जीनतमहल, कमलामार्केट, नवदेहली

कालिदासेन प्रकृतिः मानवसहचरीरूपेण वर्णिता। यदा तस्य पात्राणि हृष्यन्ति तदा प्रकृतिः अपि प्रफुल्ला भवति। यदा तस्य पात्राणि दुःखितानि भवन्ति तदा प्रकृतिरपि रोदितीव। यथा अभिज्ञानशाकुन्तले चतुर्थेऽ± शकुन्तला यदा कण्वाश्रमं त्यक्त्वा पतिगृहं प्रयाति तदा तस्या वियोगे मृगा तृणचर्वणं विस्मरन्ति, मयूरास्तस्याः शोके नृत्यं त्यजन्ति, किमन्यत् वृक्षा लताश्चापि रुदन्ति पत्ररूपाणि अश्रूणि च पातयन्ति-

**उद्गलितदर्भकवला मृगाः परित्यक्तनर्तना मयूराः।**
**अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः॥**

कालिदासस्य काव्ये मानवमनसोऽपि गम्भीरचित्रणं वयं पश्यामः।



# भारतीय सभ्यता-संस्कृतेः प्रतीकाः एते उत्सवाः

-सुरीति नागरः *

उत्सवानां परम्परा भारतीयसंस्कृतेः शोभा अस्ति। एते उत्सवाः जनजीवने प्राणवत् सन्ति। अस्माकं पूर्वजाः उत्सवान् केवलं पूजायै न, अपि तु वैज्ञानिकदृष्ट्या अपि महत्त्वपूर्णान् मन्यन्ते स्म। शरदृतोः उत्सवानां आरम्भं वयं श्राद्धकर्मणा कुर्मः।

श्राद्धेषु वयं स्वपूर्वजानां स्मरणं कुर्मः तथा तेषां प्रति श्रद्धां आदरं च प्रकटयामः। वर्षे एकवारं एतत् कर्म कृत्वा वयं तेषां सत्कर्मणां स्मृत्या स्वजीवनं सन्मार्गे स्थापयामः।

श्राद्धकर्म समाप्ते अनन्तरं जगदम्बा माता प्रत्येकं गृहे आगच्छति। सा ज्योतिर्मयी भवति। नवदिनानि नवरात्रिरूपेण वयं तस्याः पूजनं अर्चनं च कुर्मः। एतेषु दिनेषु वयं स्वमनः शुद्धं कुर्मः। अस्माकं अन्तर्मनसि पापेभ्यः, अपराधेभ्यः च दूरं स्थातुं दृढः संकल्पः जायते।

नवरात्रे उपवासानां व्यवस्था अपि अस्माकं पूर्वजैः बुद्धिपूर्वकं कृताऽस्ति। एतेषु उपवासेषु केवलं अन्नस्य सेवनं वर्जितं भवति। यदा पुरातनं धान्यं समाप्तिं गच्छति तथा नूतनशस्यस्य आगमनाय किञ्चित्कालः अवशिष्यते, तदा नवदिनेषु अन्नस्य रक्षणेन खाद्यसमस्या न जायते।

एतेषु दिनेषु अन्यपदार्थानां यथा-शृङ्गाटकस्य, कु।कस्य, सामकचावलस्य, शर्करकन्दस्य च-सेवनं भवति। एतेषाम् उपयोगेन वातावरणं शुद्धं सात्त्विकं च भवति।

दशहरा रावणवधस्य प्रतीकरूपेण आगच्छति। अस्य उत्सवस्य एषा एव शिक्षा अस्ति यत् पापिनः अन्तः कदाचित् अपि शुभो न भवति, अपि तु एकस्मिन् न एकस्मिन् दिने अवश्यमेव दारुणः भवति।

करवाचतुर्थीव्रते अखण्डसौभाग्यस्य कामना क्रियते। अस्मिन् व्रते शिवपार्वत्योः विधिवत् पूजनं, प्रार्थना च क्रियते तथा रात्रौ चन्द्रमसे अर्घ्यं दत्तं भवति।

यदि करवाचतुर्थ्यां अखण्डसौभाग्यस्य कामना भवति, तर्हि अहोई-अष्टम्यां सन्तानानां रक्षणाय तथा तेषां उन्नत्यर्थं निष्ठा प्रकट्यते। तदनन्तरं धनतेरसपर्वणि नूतनपात्राणां क्रयणं, धूपदीपानां व्यवस्था, नैवेद्यस्य च सिद्धिः, खील-बताशानां च संग्रहः क्रियते। एवमेव दीपावल्याः अनन्तरदिवसस्य सम्पूर्णा सज्जा भवति।

दीपावलीपर्व आगच्छति। गृहेषु स्वच्छता, वर्णलेपनं तथा नूतनरूपेण गृहस्य अल±रणं कर्तुं कल्पनया गृहस्य प्रत्येकः कोणः दीप्तिमान् क्रियते। लोकोक्तिरपि अस्ति यत् लक्ष्म्याः दृष्टिः यत्र किञ्चिदपि मलिनता दृश्यते, तं कोणं विलोक्य सा तस्मात् द्वारात् एव निवर्तते।

*-ई-१/७, द्वितीय तलम् , मालवीयनगरम्, नवदेहली -११००१७

दीपावल्याः अनन्तरदिवसे प्रातःकाले एव अन्नकूटोत्सवः आरभ्यते। तत्र षट्पञ्चाशत् प्रकारैः भोज्यैः भगवन्तं भोगं समर्प्यते।

ततः परदिने भ्रातृभगिन्योः प्रेमं निरन्तरं धारयितुं प्रेरणां ददन् भ्रातृद्वितीयायाः पर्व आगच्छति।

"एवं युगानुयुगं एतानि पर्वाणि अस्माकं संस्कृतिं जीवन्तां कुर्वन्ति।"



# शनैश्चरचरितम्

-डॉ. रामकिशोरमिश्रः *

नीलाऽञ्जनसमाभासं सूर्यपुत्रं यमाऽग्रजम्।
छायामार्तण्डसम्भूतं तं नमामि शनैश्चरम्॥

शनैश्चरः क्रूरदेवो यमाक्रामति पुरुषम्।
सुखं शान्तिं न प्राप्नोति स जनो निजजीवने।



अस्याऽऽक्रमणस्य कालः साऽर्धोऽस्ति सप्तवार्षिकः।
यो गेहस्य त्यागं काले कारयति, स निन्द्यते॥

राजधानीं त्यक्त्वा राजा नलः शनिदशावशात्।
वनं गत्वा सह दुःखैः स्वजीवनमयापयत्॥

कस्मिन्नपि जने चाऽस्य सार्धद्विवार्षिका दशा।
तस्मिन् सीमितकाले स बहुकष्टानि वर्षति॥

कस्याऽप्ययं कालोभूत्वा ह्यवतरति जीवने।
तं समूलं नाशयति बालकैर्भार्यया सह॥

सप्तविंशतिवर्षेभ्यः पश्चादायात्ययं शनिः।
त्रिवारमस्याऽऽगमनं नहि केनाऽपि दृश्यते॥

यमोऽस्त्यस्य लघुभ्राता सोऽस्य कार्ये सहायकः।
रामकिशोरमिश्रोऽयं नमति तं शनैश्चरम्॥

-द्वारा श्रीसौरभमिश्रः, २९५/१४ पीरामपुरम्, खेकड़ा, (बागपत) उत्तरप्रदेशः

# परशुरामचरितम्

-डॉ. रामकिशोर मिश्रः

श्रीपरशुरामो जमदग्नेः पुत्रः ऋचीकस्य च पौत्र आसीत्। रेणुका तस्य माताऽऽसीत्। ऋचीको भृगोः पुत्रोऽभूद् यस्य पत्नी सत्यवती कान्यकुब्जस्य राज्ञो गाधेर्दुहिताऽऽसीत्। सत्यवत्या भ्राता नाऽऽसीत्। अतस्तया ऋचीकः प्रार्थितो यन्मम मातुः पुत्रः स्यादित्युपायं कुरु। येन पुत्रमन्त्राऽभिमन्त्रितौ द्वौ चुरू दत्तौ। कथितं च-प्रथमचुरुजलं त्वं पिब, येन ते सुतः स्यात्। द्वितीयचुरुजलं तव माता पिबेत् येन तत्सुतः स्यात्। परं चुरुजलपाने विपर्ययाऽभूत। सत्यवत्या द्वितीयचुरुजल पीतम्, येन तथा जमदग्निरुत्पन्नः। सत्यवत्या मात्रा प्रथमचुरुजलं पीतम्, येन तया विश्वरथ उत्पन्नोभवत्।

विश्वरथो गाधेः सुतो ब्रह्मतेजसा सम्पन्नोऽभूत्। यस्तपसा विश्वामित्रोऽभवत्। जमदग्निः क्षत्रियतेजसा सम्पन्नोऽभूत। स परशुरामं स्वमातू रेणुकायाः शिरश्छेत्तुमादिशत्। परशुरामोऽपि स्वमातुः शिरश्छित्वा स्वपितु-र्जमदग्नेरादेशमपालयत्। रेणुकायाः शिरश्छिन्नं दृष्ट्वा जमदग्निः प्रसन्नो भूत्वा स्वपुत्रं परशुरामं वरं याचितुमुक्तवान्। परशुरामोऽपि स्वमातरं रेणकां जीवयितुं वरमयाचत। ततो जमदग्निः स्वपुत्रजननीं रेणुकामजीवयत्।

हैहयवंशोत्पन्नः कार्तवीर्यः कामधेनुं जमदग्निमयाचत। निषेधं श्रुत्वा कार्तवीर्येण शस्त्रेण जमदग्निर्हतः। जननीविलापं श्रुत्वा परशुरामेण स्वपरशुना कार्तवीर्यो हतः प्रतिज्ञा च कृता यदेकविंशतिवारं स हैहयवंशीयक्षत्रियान् परशुना हत्वा पृथ्वीं तद्विहीनां करिष्यति। ततः परशुना तेनेतस्ततो निवासिनो हैहयक्षत्रियाः सर्वे हतास्तद्वंशहीना च पृथ्वी कृता।

परशुरामस्य पूर्वं नाम राम आसीत् परं परशुधारणात्स परशुरामोऽभवत्। नमः परशुरामाय हैहयवंशहन्त्रे नमः।

---

-द्वारा श्रीसौरभमिश्रः, २९५/१४ पं॰रामपुरम्, खेकड़ा, (बागपत) उत्तरप्रदेशः

सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

# ''संस्कृत-चन्द्रिका''

नैतिक-मूल्यों के साथ-साथ
सम्पूर्ण देश के वरिष्ठ-बाल-साहित्यकारों तथा नवोदित प्रतिभाओं
की लेखनी की संयुक्त प्रस्तुति

## ''संस्कृत-चन्द्रिका''

( आई.एस.एस.एन.-2347&1565 )

**संस्कृत भाषा के प्रचार-प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की मासिक बाल पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।**

**मूल्यः- एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र**

**सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका**

## ''संस्कृत-चन्द्रिका''

**के स्थायी अध्येता बनें।**

**आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली संस्कृत अकादमी के नाम से दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट अथवा अकादमी के बैंक खाते सं. 0170104000256228 5, आई.एफ.सी. कोड-** IBKL 0000170 (IDBI BANK- Preet Vihar) **में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।**

पत्र व्यवहार का पता -

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**
**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**
**दूरभाष सं.- ०११-२०९२०३६३**

RNI No.
DELSAN/2002/8921

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी
के स्वामित्व में अकादमी के कार्यालय प्लाट सं.-५,
झण्डेवालान, करोलबाग, नई दिल्ली-११०००५
से प्रकाशित